**बिल्वसू** स्त्री "बिल्वसूर्दशपुत्रा स्यादिति" शब्दर० उक्तायां प्रसूतदशपुत्रायां स्त्रियाम् ।

**बिल्व** पु० बिल-उल्व् बा० नि० । १स्वनामख्याते वृक्षे अमरः "श्रीफलः प्रवरस्तिक्तो ग्राही रूक्षोऽग्निपित्तकृत् । बालः श्लेष्महरो बल्यो लघुरुष्णश्च पाचनः" भावप्र० । "बिल्वं बालं कषायोष्णं पाचनं वह्निदीपनम् । संग्राहि तिक्तकटुकं तीक्ष्णं वातकफापहम् । पक्वं सुगन्धि मधुरं दुर्जरं ग्राहि दोषलम् । फलेषु परिपक्वेषु यो गुणः समुदाहृतः । बिल्वादन्यत्र स ज्ञेयो बिल्वमामं गुणोत्तरम् । कफवातामपित्तघ्नी ग्राहिणी बिल्वपेषिका" राजवल्लभः । "काञ्जिके संस्थितं बिल्वमग्निसन्दीपनं परम्" इति वैद्यकम् । २तत्फले न० मेदि० । ३पलपरिमाणे न० शब्दमाला । तद्वृक्षोत्पत्त्यादिर्यथा "भृगोर्लक्ष्मीश्च या धेनुर्गोरूपा सा गता महीम् । तद्गोमयभवो बिल्वः श्रीश्च तस्मादजायत । "बिल्ववृक्षः प्रियः शम्भोस्तत्र योनिर्भविष्यति । सर्वपुष्पोत्तमः श्रेष्ठो देवाहारो मनोरमः । अच्छेद्यः सर्व्वलोकानां छेदान्नाशः सदा नृणाम् । ये च पापा दुराचाराः श्रीतरोश्छेदकारिणः । ते रवीचग्रादिनरके पात्यन्ते ब्रह्मणो दिनम् । सुदुःखिता भविष्यन्ति नरा दुष्कुलिनः सदा । तत्र देशे भयं नित्यं चिरं राजा न जीवति । न च द्रव्यपतिः कश्चिद् बिल्ववृक्षस्य छेदकः । क्रियते यत्र विच्छेदः सपुष्पफलिनस्तरोः । अनावृष्टिभयं घोरं तस्मिन् देशे प्रजायते" । अग्निपु० । बृहद्धर्मपुराणे १०अ० अस्योत्पत्तिरन्यथोक्ता "लक्ष्म्या शिवाराधनार्थं स्वैकस्तनस्योत्पाटने कृते तुष्टेन शिवेन लक्ष्मीं प्रत्युक्तं यथा "मातः समुद्रतनये ! मा मा छिन्धि स्तनं परम् । यस्ते छिन्नः स्तनो वामो जायतां पुनरेव सः । ज्ञाता ते परमा भक्तिः पूर्णस्तेन मनोरथः । यश्च छिन्नस्तनो भक्त्या मल्लिङ्गोपरि ते शुभे । सोऽस्तु वृक्षः क्षितौ पुण्यो नाम्ना श्रीफल इत्यतः । मूर्त्तिमांस्तव वै भक्तिवृक्षः श्रीफलनामकः । त्वत्कीर्त्तये क्षितावास्तां यावच्चन्द्रदिवाकरौ । स तरुर्मम वै लक्ष्मि ! परमः सुप्रियो भवेत् । तत्पत्रेणैव मे पूजा भविष्यति न चान्यथा । स्वर्णमुक्ताप्रवालादि पुष्पाण्यन्यानि च ध्रुवम् । श्रीफलच्छदलेशस्य कलां नार्हन्ति कोटिकाम् । यथा मे श्रीफलतरुर्यथा जह्नुजलं मम । तथा प्रियतमं लक्ष्मि ! त्रिपत्रः श्रीफलच्छदः" तत्रैव ११अ० । "धनुः शतञ्चास्य मूलात् सर्व्वाग्रं तीर्थमुच्यते । अधो भूमेस्तथा तीर्थमतस्तीर्थत्रयं सखि ! । जटपत्रं हरो ज्ञेयः पत्रं वामं विधिः स्वयम् । अहं दक्षिणपत्रञ्च त्रिपत्रदलमित्युत । अस्य छायाञ्च पत्रञ्च लङ्घयेन्न पदा स्पृशेत् । हरते लङ्घनादायुः पदा स्पर्शात् श्रियं हरेत्" । इत्यादिना तन्माहात्म्यमुक्त्वा तत्पत्रहरणविधानादि तत्रोक्तं यथा "पञ्चान्तद्वादशीसायमध्याह्नभिन्नकालतः । शाखाभङ्गो न कर्त्तव्यो नैवारोहेत्तथा तरुम् । वरमारुह्य चिनुयान्न शाखाभञ्जनं क्वचित् । खण्डितैश्च शिवः पूज्यः पत्रैरन्यैश्च खण्डितैः । षण्मासानन्तरं बिल्वपत्रं पर्य्युषितं भवेत् । पूज्या एतेन वै देवाः सूर्य्यलम्बोदरौ विना । बिल्ववृक्षवनं यत्र सा तु वाराणसी पुरी । पञ्च बिल्वद्रुमा यत्र तत्र तिष्ठेत् स्वयं हरिः । सप्त बिल्वद्रुमा यत्र तत्र दुर्गायुतो हरः । एको बिल्वतरुर्यत्र तत्र शम्भुर्मया सह । बिल्ववृक्षा यत्र दश तत्र शम्भुर्गणैः सह । एतान्युक्तानि तीर्थानि देवाः सर्वे मरुद्गणैः । यत्र वाट्यां गृहस्थस्य कोणे ईशाननामके । जायते श्रीफलतरुर्न तत्र विपदः क्वचित् । पूर्वस्यां सुखदः स स्याद्दक्षिणे यमभीतिहा । पश्चिमे च प्रजादायी वृक्षो बिल्व उदाहृतः । श्मशाने च नदीतीरे प्रान्तरे वा वनान्तरे । बिल्ववृक्षतलं प्रोक्तं सिद्धपीठस्थलं समम् । न मध्यप्राङ्गणे वृक्षं स्थापयेत् श्रीफलाख्यकम् । दैवाद् यदि प्रजायेत तदा शिववदर्च्चयेत् । चैत्रादिचतुरो मासान् शम्भवे परमात्मने । दत्तं स्याद् बिल्वपत्रैकं लक्षधेनुसमं सुराः । मध्याह्नकाले ये मर्त्या बिल्वं कुर्य्युः प्रदक्षिणम् । तैः सुमेरुर्गिरिवरः कृतएव प्रदक्षिणम् । न छिन्द्यात् श्रीफलतरुं न दहेत् काष्ठमेव च । विना ब्राह्मणयज्ञार्थं पतितो बिल्वविक्रयी । पक्वबिल्वसमुद्दिष्टं यो धत्ते मूर्ध्नि मानवः । यमाधिकारो नात्र स्यात् हृतः पापोपपातकैः । बिल्वपत्रं फलं वीजं भूमौ पतितमीश्वरः । स्वयं गृह्णाति शिरसा वैयर्थ्यभयशङ्कितः । चैत्रादिचतुरो मासान् सिञ्चेद् बिल्वतरुं कृती । यथा स्निग्धो भवेद्वृक्षस्तथा तत्पितरोऽपि च । चैत्रादिचतुरो मासान् सदा भ्रमति शङ्करः । नवीनबिल्वपत्रार्थी भुक्तिमुक्तिप्रदायकः । हार्द्दानगरे यत्र वैद्यनाथो महेश्वरः । तत्राक्षयो बिल्ववृक्षः स्वर्गवृक्ष उदाहृतः । कामरूपे कामतरुः कामाख्यासुक्तस्तथादिमः । काञ्चीपुरे पुरः प्रोक्तः श्रीफलोऽक्षयपुण्यदः । तेऽपि तीर्थविशेषाः स्युस्तीर्थेष्वपि सदाऽतुलाः ।" बृहद्धर्मपु० ११अ० । "तत्फलैस्तत्प्रसूनैश्च